Chapter-6

# षष्ठं प्रकरणम्

## १.६.० वृद्धवसिष्ठसंहितायां वास्तुविचारः

अथ वृद्धवसिष्ठसंहिताया अष्टात्रिंशदध्याये गृहप्रवेशस्य विषयश्चतुर्विंशतिश्लोकैः वर्णितः।

### १.६.१ गृहप्रवेशे शुभाशुभफलम् —

अथ सौम्यायने, गुरुशुक्रयोर्बलान्विते, शुक्लपक्षे, शुभवासरे नूतनगृहे वास्तोः पूजनेन भूतबलिं च कृत्वा गृहप्रवेशं कारयेत्। कालशुद्धिविचारं कृत्वा नूतनगृहेप्रवेशं कुर्यात्। द्वन्द्वस्तथा च सुपूर्वप्रवेशे कालशुद्धिविचारो न कर्तव्यः। केवलं पञ्चाङ्गशुद्धिदिने सुलग्ने वास्तोः पूजनमेवं गृहप्रवेशं पूर्ववत् कार्यम्। नूतनगृहे प्रथमप्रवेशोऽपूर्वसंज्ञः तथा च यात्रावसाने सुपूर्वसंज्ञः प्रवेशः कथ्यते। अग्नि-जल-वायु-विद्युतादिभयजातगृहे जीर्णोद्धारं कृतं यः प्रवेशो स एव द्वन्द्वप्रवेशः कथ्यते। एतत्प्रकारेण त्रिविधो प्रवेशः कथ्यते ।[३५३]

दिनसमये गृहप्रवेशः शुभदः कथ्यते। सुपुत्रपौत्राभिवृद्धिरिति फलं प्राप्नोति। सूर्यचन्द्रयोर्बलान्विते तथा च बुधवासरे एवं पूर्वतिथिश्च रात्रिं विना निशाकाले गृहप्रवेशः शुभदः स्यात् ।[३५४]

१. **अथ वारपरत्वेन गृहप्रवेशफलम्** — रविवासरे, भौमवासरे यदि कृत्तिकानक्षत्रं स्यात्, तदा तद्दिने नूतनगृहे, अग्निकुम्भप्रवेशे वह्नेः कारणेन गृहं दग्धं भवति। सोमवासरे, नूतनगृहे प्रवेशो वृद्धिकारको भवति। बुधवासरे, गुरुवासरे, शुक्रवासरे नूतनगृहे प्रवेशः श्रीकरः-लक्ष्मीदायकः पुत्रप्रदस्तथा विपुल- धनलाभदो भवति। शनिवासरे, दिने गृहप्रवेशः

---

३५३ व.सं. अ. ३८ श्लो.१ तः ३

३५४ व.सं. अ. ३८ श्लो.४

स्थिरप्रदः किन्तु तत्र चौर्यभयं विद्यते।[355]

२. **नूतनगृहे त्याज्यतिथ्यादिविचार :** - रिक्तातिथिः (४,९,१४), अमावस्या (३०), दग्धतिथिः, सूर्यभौमयोः षड्वर्गः, सूर्यचन्द्रौ पापग्रहेण युतौ द्रष्टौ वा, सूर्यचन्द्रौ यन्नक्षत्रे स्थितौ, यत्पापग्रहेण विद्धं नक्षत्रम्- इत्यादयो योगास्त्रिविधगृहप्रवेशे त्याज्याः।[356]

३. **मासपरत्वेन नूतनगृहप्रवेशे फलम्** - नूतनगृहे प्रथमप्रवेशो माघमासे कृत्वा अर्थलाभ इति फलं प्राप्नोति। नूतनगृहे प्रथमप्रवेशं फाल्गुनमासे कृत्वा पुत्रलाभस्तथा अर्थलाभ इति फलं प्राप्नोति। नूतनगृहे प्रथमप्रवेशं चैत्रमासे कृत्वा धनहानिर्भवेत्। नूतनगृहे प्रथमप्रवेशं वैशाखमासे कृत्वा पशु-पुत्रलाभो भवेत्। ज्येष्ठमासे तथा चान्यमासेषु - अर्थात्-ज्येष्ठ-आषाढ-श्रावण-भाद्रपद-अश्विन-कार्त्तिक-मार्गशीर्ष- पौषमासेषु नूतनगृहे प्रथमप्रवेशः हानिप्रद एवं शत्रुभयप्रदश्च -इति फलं लभ्यते। शुक्लपक्षे नूतनगृहप्रवेशो निरन्तरवृद्धिकारको भवेत्। कृष्णपक्षे नूतनगृहप्रवेशो दशमीपर्यन्तं शुभो भवति।[357]

४. **नक्षत्रपरत्वेन नूतनगृहप्रवेशे फलम्** -- चित्रा-उत्तराफाल्गुनी-उत्तराषढा-उत्तराभाद्रपदा-रोहिणी-मृगशीर्ष-अनुराधा-धनिष्ठा- रेवती- शतभिषा- एतेषु नक्षत्रेषु अपूर्वसंज्ञकः, सूपूर्वसंज्ञकः तथा च 'द्वन्द्वसंज्ञकः-एते त्रिविधगृहप्रवेशा आयुर्धनारोग्यसुपुत्रपौत्रसुकीर्तिदाः- इति फलमाप्नोति। हस्त-स्वाती-पुष्य-पुनर्वसु-अश्विनी-श्रवणनक्षत्रेषु नूतनगृहे प्रवेशः शुभदः स्यात्। अब्दत्रयात् परहस्तंगतः स्यात्। तथा च शेषेषु नक्षत्रेषु मृत्युदः स्यात्। भरणी-कृत्तिका-आर्द्रा-आश्लेषा-मघा-पूर्वाफाल्गुनी-विशाखा-ज्येष्ठा-मूल-पूर्वाषाढा-पूर्वाभाद्रपदा- एतेषु नक्षत्रेषु नूतनगृहे प्रवेशं कुर्वन् मृत्युमाप्नोति।[358]

---

३५५ व.सं. अ. ३८ श्लो.५, ६

३५६ व.सं. अ. ३८ श्लो. ७

३५७ व.सं. अ. ३८ श्लो. ८, ९

३५८ व.सं. अ. ३८ श्लो. १०, ११

पञ्चागसंशुद्धिदिने, रात्रौ ताराबले, शुभ–अष्टकवर्गयुते, सौम्ये स्थिरलग्ने, लग्ने शुभग्रहाणां युते दृष्टे वा द्विस्वभावलग्ने स्थिरलग्ने वा नूतनगृहे प्रवेशः कर्तव्यः। यदि लग्नेशोऽष्टमस्थाने स्थितः, अष्टमेशो लग्ने स्थितः वा पञ्चेष्टिकेऽप्यष्टमशुद्धियुक्ते चरांशलग्ने शुभग्रहेण युते दृष्टे वा तदा गृहप्रवेशकार्यं कुर्वन् शुभप्रदं स्यात्। यदि जन्मराशिर्लग्ने संस्थिता, तदा सा अभीष्टराशिरिति प्रदिष्टम्, राशिक्रमेण व्याधिरहितः, दारिद्र्यं, यशस्करः, सुहन्नाशकः सुतघ्नो, रिपुनाशदः कलत्रहन्ता, निधनप्रदः रौद्रप्रदः, सिद्धिकरः, अर्थदश्च तथा शत्रुभयदः–इति फलविचारः। अपूर्व– सूपूर्व– द्वन्द्वसंज्ञकेष्वेतेषु त्रिविधगृहप्रवेशेष्वेतच्छुभाशुभफलं ज्ञेयम्। केन्द्रे (१,४,७,१०), त्रिकोणे (५,९), तृतीय–द्वितीय–एकादशस्थानेषु वा यदि शुभग्रहाः संस्थिताः, तथा च तृतीय–षष्ठ–एकादशस्थानेषु वा पापग्रहाः संस्थिताः, तथैव लग्न–द्वादश–षष्ठ–अष्टमस्थानानि विहायान्यस्थानेषु यदि चन्द्रमाः स्थितः, तदा नूतनगृहे प्रवेशः लक्ष्मीनिलयः प्रवेशः कथ्यते।[३५९]

यद् दिग्द्वारे गृहद्वारं स्यात् , तदा तद्दिङ्नक्षत्रे ये ग्रहा उक्तास्तत्र प्रवेशः शुभः स्यात्, न तु सर्वेषु सन्निवेशः। पुष्यो मध्यः सन्निवेशे, वाराणां मध्ये शनिवासरे गृहप्रवेशः शुभः स्यात्। मकरादि षड्राशिषु–मकर–कुम्भ–मीन–मेष–वृषभ–मिथुनादिराशिषु, उत्तरायणे सूर्ये संस्थिते, नवप्रवेशः सदैवः शुभदः स्यात्। केषांचिदाचार्याणां मतेन, कुम्भचक्रशुद्धिं विना सन्निवेशे सौरमिष्टं, गृहप्रवेशः शुभः स्यात्। यदि प्रवेशलग्नत अष्टमे यः क्रूरग्रहः स्थितः, क्रूरग्रहस्य लग्ने वा तथा च यदि क्रूरग्रहाः शुभराशिगताः स्युः, तदा प्रवेशकर्तुस्त्रिवर्षानन्तरमष्टमवर्षपर्यन्तं नाशो भवति। क्षीणचन्द्रमा यदि षष्ठ–अष्टम–द्वादशस्थाने वा स्थितः पापग्रहेण युतो दृष्टो वा तदा शुभग्रहेण निरीक्षितश्चेत्तदापि त्रिवत्सरेण कर्तुः स्त्रियो हानिः। सूर्यो यदि परभागे स्थितः, बलान्विते सप्तमदशमस्थाने वा गतस्तदा

---

३५९ व.सं. अ. ३८ श्लो. १२ तः १६

नूतनगृहे प्रवेशं कुर्वन्, तस्य गृहं परहस्तङ्गतं करोति। गजाश्वशालादिषु सन्निवेशे पशूनां पशुयोनिराशौ शुभदः स्यात्। यदि शुभग्रहेण युतो दृष्टो वा तदा गृहप्रवेशोऽत्यन्तं शुभदः सुखदः स्यात्।[360]

वास्तुपूजनेन रहितं गृहं, बलिं विना गृहं, छन्नगृहं, विरूपं गृहं, कपाटहीनं च गृहं- एतादृशे नूतनगृहप्रवेशं कृत्वा सर्वापद आपतेत्। पृष्ठतो शुक्रः, वामतोऽर्कः, अग्रतः पूर्णकुम्भः, हर्म्यं रम्यतोरणैः स्त्रग्वितानैः स्त्रीभिः सम्यक् गीतवाद्यैर्विशेत्ततो विप्रान्पूजयेत् नूतनगृहे प्रवेशं कारयेत्।[361]

## १.६.२ सुरप्रतिष्ठाविचारः —

अथ वृद्धवसिष्ठसंहिताया चत्वारिंशताध्याये सुरप्रतिष्ठाविषय एकविंशतिभिः श्लोकैः वर्णितः ।

विष्णुशिवयोश्च तथान्यदेवतानां प्रतिष्ठामुहूर्तविचारे उत्तरायणे, गुरुशुक्रयोर्दृश्यमाने देवप्रतिष्ठास्थापनं कार्यम्।[362]

१. **मासपरत्वेन देवप्रतिष्ठास्थापनफलं** — माघमासे फाल्गुनमासे वा देवप्रतिष्ठां कृत्वा गृहस्वामिनो धनायुरारोग्यवृद्धिः-इति फलं प्राप्नोति। चैत्रमासे देवप्रतिष्ठां कृत्वा महारोगभयमिति फलं लब्धं भवति ।ज्येष्ठमासे वैशाखमासे च पुत्रधनप्रदत्वफलं प्राप्नोति। आषाढ-श्रावण-भाद्रपद-आश्विनमासेषु-एतेषु चातुर्मासेषु देवप्रतिष्ठास्थापनं कृत्वा गृहस्वामिनः पत्नी तथा सन्तानानां विनाशो भवति। कार्त्तिकमासे देवप्रतिष्ठास्थापनं मृत्युप्रदं

---

३६० व.सं. अ. ३८ श्लो. १७ तः २२
३६१ व.सं. अ. ३८ श्लो. २३, २४
३६२ व.सं. अ. ४० श्लो. १

भवति। पौषमासे उत्तरायणे देवप्रतिष्ठास्थापनं निखिलदु:खप्रदं भवति।[३६३]

शुक्लपक्षस्याद्यदिनं विहायान्यदिनेषु तथा कृष्णपक्षेऽन्त्यत्रिभागं परिहृत्य देवप्रतिष्ठास्थापनं प्रशस्तम्। रिक्तातिथि: (४,९,१४), अमावास्यातिथि: (३०), क्षयतिथि:, अयुक्तदिनं, निन्द्ययोग:–एतानि वर्जयित्वा, वैनाशिक–महादोषविवर्जितेषु चन्द्रताराबलसंयुते देवप्रतिष्ठासंस्थापनं कार्यं शुभावहम्। यस्य देवस्य यन्नक्षत्रं तिथिवारौ प्रशस्तौ तद्दिने, गृहस्वामिन: सूर्य: यत्समये बली स्यात्, तद्दिने तथा च ग्रामाधिपस्य ग्रामबलं विचार्य देवप्रतिष्ठास्थापनं कर्म कारयेत्।[३६४]

२. **नक्षत्रपरत्वेन शुभाशुभफलम्** — हस्तं–चित्रा–स्वाती–अनुराधा–ज्येष्ठा–मूलं–श्रवण:–धानिष्ठा–शतभिषा:–रेवती–अश्विनी–पुनर्वसु:–पुष्यं – उत्तराफाल्गुनी – उत्तराषाढा – उत्तराभाद्रपदा – रोहिणी – मृगशीर्ष: – एतेषु नक्षत्रेषु देवप्रतिष्ठासंस्थापनकार्यमुत्तमं स्यात्।[३६५]

३. **वारपरत्वेन शुभाशुभफलम्** — सूर्यादिवारेषु क्रमेण, रविवासरे कीर्तिप्रदत्वम्, सोमवासरे क्षेमकरत्वम्, भौमवासरे वह्निभयं, बुधवासरे वृद्धिकरं, गुरुवासरे नृपाणां वृद्धिकरं, शुक्रवासरे लक्ष्मीकरं तथा च शनिवासरे सुस्थिरत्वं –एतत्फलं देवप्रतिष्ठास्थापने लब्धं भवति।[३६६]

पञ्चागशुद्धिदिने, दिनस्य पूर्वार्धभागे (मध्याह्नपूर्वे), शुभमुहूर्ते, शुभग्रहयुते/दृष्टे वा लग्ने तथा च जन्मलग्नतो नैधनशुद्धिलग्ने –इति विचार्य देवसंस्थापनकार्यं कारयेत्। तच्छुशुभावहं भवति। गुरु–चन्द्र–सूर्यादिमुख्यग्रहै: पञ्चेष्टिके सौम्यनवांशयुक्ते स्थिरलग्ने,

---

३६३ व.सं. अ. ४० श्लो. २, ३
३६४ व.सं. अ. ४० श्लो. ४ त: ६
३६५ व.सं. अ. ४० श्लो. ७
३६६ व.सं. अ. ४० श्लो. ८

द्विस्वभावलग्ने, स्थिरनवांशके वा देवप्रतिष्ठासंस्थापनकार्यं शुभम्। चरराशिलग्ने नवांशके वा देवप्रतिष्ठासंस्थापनकार्यं त्याज्यम्। सम्पूर्णांशस्य चरलग्नं शुभकारणेन सुरनिवेशकार्ये शुभावहम्।[३६७]

४. **तन्वादिभावपरत्वेन देवप्रतिष्ठापनफलम्** — यदि देवप्रतिष्ठालग्ने सूर्यः, चन्द्रः भौमः राहुः केतुर्वा स्थितः, तदा देवसंस्थापनकार्यकर्ता मृतो भवति। यदि लग्ने शुभग्रहाः स्थितास्तदा देवसंस्थापनकार्यकर्ता सदैवायुर्धनारारोग्यमिति फलं प्राप्नोति। यदि देवप्रतिष्ठालग्नतो द्वितीयभावे सर्वे शुभग्रहाः, एवं चन्द्रमाः संस्थितः, तदा पुत्रार्थशुभप्रदाः स्युः। तत्रैव यदि पापग्रहाः संस्थिताः, तदा सदैव दुःखशोकप्रदाः, व्याधिकराश्च भवन्ति। देवप्रतिष्ठालग्नतश्चतुर्थस्थाने शुभग्रहाः संस्थिताः, तथा एकादशभावे चन्द्रमाः संस्थितः तदा कर्ता सुखवृद्धिरिति फलं प्राप्नोति। किन्तु पापग्रहकारणेन कर्ता सुखहीनो भवति। देवप्रतिष्ठालग्नतः पञ्चमस्थानगतश्चन्द्रमाः, एवं शुभग्रहा आनन्ददायित्वफलं ददति। यदि पापग्रहाः स्थिता रिपुभयदाः स्युः। देवप्रतिष्ठातः षष्ठस्थाने यदि पापग्रहाः, तदा कर्ता शत्रुहन्ता भवेत्। किन्तु तत्र यदि चन्द्रमास्तदा भयमाप्नोति । देवप्रतिष्ठालग्नतः सप्तमस्थाने चन्द्रमसा सहिताः शुभग्रहा लाभप्रदाः स्युः। देवप्रतिष्ठालग्नतोऽष्टमस्थाने यदि शुभग्रहः पापग्रहो वा ग्रहकारणेन कर्ता मृत्युफलमाप्नोति। देवप्रतिष्ठालग्नतो नवमस्थाने यदि चन्द्रमसा सहिताः शुभग्रहाः स्थिताः, तदा विजयप्रदाः, तथा च पापग्रहा दुःखशोकभयप्रदाः स्युः। देवप्रतिष्ठालग्नतो दशमस्थाने यदि चन्द्रमसा सहिताः शुभग्रहाः स्थिताः, तदा धनलाभकर्ता तथा च पापग्रहा व्याधिशत्रुभयप्रदाः स्युः। देवप्रतिष्ठालग्नत एकादशस्थाने सर्वे ग्रहाः (शुभा एवं पापग्रहाः ) स्थिताः, तदा बहुलाभदाः स्युः। देवप्रतिष्ठालग्नतः द्वादशस्थाने यदि पापग्रहाः स्थिताः, तदा व्ययकर्तारस्तथा च पापग्रहाः शोकदाः स्युः। यदि लग्न एकोऽपि

---

३६७ व.सं. अ. ४० श्लो. ९ तः ११

बुधो गुरुः शुक्रो वा बली चेत्तदा शीघ्रं समस्तदोषान् निहन्ति यथा तारकासुरनामानं दैत्यं भगवान् कार्तिकेयद्वारा निहन्ति। धनेन हीनं देवप्रतिष्ठाकर्तॄणां, मन्त्रहीनमृत्विग्विप्रमुख्यस्य तथा च निमित्तहीनं (लक्षणहीनं) देवप्रतिष्ठाकर्तुर्भार्याया विनाशं करोति।[३६८]

## १.६.३ वस्त्रपरिधानविचार : —-

वृद्धवसिष्ठसंहिताया चतुश्चत्वारिंशदध्याये, वस्त्रपरिधानविषयका: २१ श्लोका: सम्मिलिता: सन्ति।

नक्षत्र एवं वारानुसारेण नवाम्बरधृतिर्मनुष्याणां सन्मानायतनमिति फलं कथितम्। तथा च सत्कीर्तिः–सौभाग्यं –शत्रूणां दमनं –मित्राणां प्रियकारित्वं –सुन्दरवक्ता–कान्तिदः–विद्यानां तिलकः– सभायां जयकरत्वं–त्रैलोक्यवश्यकरित्वम्– एतानि फलानि प्राप्नोति।

**१. अश्विन्यादिनक्षत्रानुसारेण नूतनवस्त्रधारणफलं निम्नदर्शितं भवति।**[३६९]

| क्रम: | नक्षत्रनामानि | | नूतनवस्त्रधारणे फलं |
|---|---|---|---|
| १ | अश्विनी | – | निरन्तरलाभो भवति। |
| २. | भरणी | – | अत्यधिकं क्लेशमेवं धनहानिर्भवेत्। |
| ३. | कृत्तिका | – | नृपपूजने नियतः। |
| ४. | रोहिणी | – | स्वजनविरोधः भवति। |
| ५. | मृगशीर्षम् | – | स्वमित्रतो हानिः स्यात्। |
| ६. | आर्द्रा | – | स्थल–जल–कनकप्राप्तिः। |
| ७. | पुनर्वसुः | – | विपुलां कीर्तिं प्राप्नोति। |

---

३६८ व.सं. अ. ४० श्लो. १२ तः २१

३६९ व.सं. अ. ४४ श्लो. १ तः ६

| | | | |
|---|---|---|---|
| ८. | पुष्यं | – | अखिलजनैर्विरोधो भवति। |
| ९. | आश्लेषा | – | अग्निभयं स्यात्। |
| १०. | मघा | – | पुत्रहानिर्भवेत्, विरोधो भवेत्। |
| ११ | पूर्वाफाल्गुनी | – | लाभो भवति। |
| १२ | उत्तराफाल्गुनी | – | स्वबन्धुजनाः पूजनं कुर्वन्ति। |
| १३. | हस्तं | – | अखिलस्थितिं लाभं प्राप्नोति। |
| १४. | चित्रा | – | पशुलाभो भवति। |
| १५ | स्वाती | – | आभूषणलाभो भवति। |
| १६ | विशाखा | – | अतुला धन-धान्यहानिर्भवेत्। |
| १७ | अनुराधा | – | स्वजनविरोधो भवति। |
| १८ | ज्येष्ठा | – | कलत्रकलहो भवति। |
| १९ | मूलं | – | द्विजदेवतानां पूजनं करोति। |
| २० | पूर्वाषाढा | – | हानिर्भवेत्। |
| २१ | उत्तराषाढा | – | बहुविधरोगो भवति। |
| २२ | श्रवणः | – | समस्तगुणलाभो भवेत्। |
| २३. | धनिष्ठा | – | कदन्नाशनलाभो भवति। |
| २४ | शतभिषाः | – | निरन्तरं विदेशगमनं करोति। |
| २५ | पूर्वाभाद्रपदा | – | शत्रोर्भयमाप्नोति। |
| २६ | उत्तराभाद्रपदा | – | परस्त्रीलाभो भवति। |
| २७ | रेवती | – | प्रभूतमणिसुवर्णवस्तुलाभो भवति। |

२. **नवधा विभक्तं नूतनवस्त्रस्य फलम्** — यदि नूतनवस्त्रमग्निकारणेन दग्धं भवति, मूषककाष्ठादिलोहद्वारा हतं, तथा च हरिद्रारससूत्रेण वस्त्रं नवधा विभक्तं शुभाशुभं विचिन्तयेत्। नूतनवस्त्रस्य चतुष्कोणेषु देवता निवसन्ति। तदन्त्यमध्ययोर्मनुजा निवसन्ति। तथा च शेषेषु त्रितयभागेषु दैत्या निवसन्ति। एवंप्रकारेण नवधाविभक्तवस्त्रस्य शुभाशुभफलं विचिन्तयेत्। देवतानामंशे धनलाभः, मनुजांशे पुत्रपौत्रधनलाभः, तथा च दैत्यानामंशे रोगभयं तथा च सर्वांशके नेष्टफलं प्राप्तं भवति ।[३७०]

३. **वारपरत्वे नवाम्बरफलम्** —रविवासरे, सूर्यांशे, सूर्यस्थितलग्ने यदि नूतनवस्त्रं धार्यते तदा शीघ्रं जीर्णं भवति। सोमवासरे, चन्द्रांशे चन्द्रस्थितलग्ने वर्गे वा यदि नूतनवस्त्रं धार्यते तदा सदैवार्द्रता भवेत्। भौमवासरे, कुजांशे कुजस्थितलग्ने वर्गे वा यदि नूतनवस्त्रं धार्यते तदाग्निभयं स्यात्। बुधवासरे, बुधांशे बुधस्थितलग्ने वर्गे वा यदि नूतनवस्त्रं धार्यते तदा लाभप्रदं स्यात्। गुरुवासरे गुरोरंशे गुरुस्थितलग्ने वर्गे वा यदि नूतनवस्त्रं धार्यते तदा बुद्धिर्वृद्धिंगता स्यात्। शुक्रवासरे शुक्रांशे शुक्रस्थितलग्ने वर्गे वा यदि नूतनवस्त्रं धार्यते तदा दया वृद्धिंगता भवति। शनिवासरे शन्यांशे शनिस्थितलग्ने वर्गे वा यदि नूतनवस्त्रं धार्यते तदा तस्मिन् क्षण एव दुःखं प्राप्तं भवति। छत्रः-ध्वजः-स्वस्तिकः-वर्धमानः-श्रीवत्सः-मत्स्यः-अम्बुजः-तोरणाद्याकृतीनां राक्षसभागेषु प्रस्थापितास्तदा लक्ष्मीसमृद्धिं कुर्वन्ति। कपोत-कंकः-उष्ट्रः-शृगालः-क्राकः-क्रव्यादः-गोमायुः-कदम्बरूपाः- एतासामाकृतीनां देवांशभागे स्थापिते, निश्चयेन शीघ्रं भयमेवं दुःखं प्राप्नोति।[३७१]

---

३७० व.सं. अ. ४४ श्लो. ७ तः ९

३७१ व.सं. अ. ४४ श्लो. १० तः १३

## १.६.४ वास्तुविचारः—-

वृद्धवसिष्ठसंहिताया एकोनचत्वारिंशदध्याये, वास्तुविषयकाः २२२ श्लोकाः सम्मिलिताः सन्ति।

१. **भूमिचयनम्** —ग्रामपुरादीनां सूक्ष्मतोऽधुना निर्माणार्थे वास्तुज्ञानं ब्रह्मणा कथ्यते। ब्राह्मणादीनां वर्णपरत्वेन गन्धवर्णरसादीनादौ क्षेत्रं परीक्ष्येत्। ब्राह्मणानां कृते श्वेतवर्णा, मधुरगन्धा मधुररसा भूमिः शस्ता। क्षत्रियाणां कृते रक्तवर्णा, पुष्पगन्धा, कटुकरसा भूमिः प्रशस्ता। वैश्यानां कृते पीतवर्णाम्लगन्धाम्लरसा भूमिः शस्ता। शूद्राणां कृते कृष्णवर्णा पिशितगन्धा तिक्तरसा भूमिः प्रशस्ता।[372]

२. **भूपरीक्षा** — एकहस्तं खातं कृत्वा तत्समन्ततः खनयेत्। रात्रादौ, तत्र जलं पूरितं , प्रातः सम्यङ्निरीक्षेत्। यदि जलयुक्तं तदा वृद्धिकरं, यदि पङ्कयुक्तं तदा मध्यमं, यदि व्रणयुक्तं तदा हानिर्भवेत्। तथा शुष्के मृत्युं समादिशेत्। एकहस्तं खातं कृत्वा तत्समन्ततः खनयेत्, तन्मृदं कृत्वा तद्वत् परिपूरयेत्। मृत्तिकाधिके वृद्धिमाप्नोति। समे साम्यं तथा क्षये क्षयमिति फलमाप्नोति। कीलकेशास्थिशुद्ध्यर्थं पुरुषत्रयप्रमाणमानां खनित्वा पाषाणसिक्ताम्बुभिः पूरयेत्। प्रागुत्तरप्लवा भूमिर्वृद्धिकारका स्यात्। ऐशान्ये प्लवोऽभीष्टसिद्धिदायकः स्यात्।[373]

३. **दिक्साधनम्** — भूपरीक्षणं कृत्वा पुनर्जलेन परिपूर्णं कृत्वा दिक्साधनार्थे, शिलातले मण्डलं रचयेत्। शङ्कुमानेन समस्थले सूत्रेण वृत्तं द्वादशाङ्गुलः शङ्कुः समं वृत्तं मध्ये न्यसेत्। वृत्ते यत्र पूर्वापराह्णयोस्तच्छायाग्रं स्पृशेत् । तत्र बिन्दुं कृत्वा पूर्वापरज्ञानं साधयेत्। तयोर्मध्ये मत्स्योना रेखा दक्षिणोत्तरा स्यात्। तथा दक्षिणोत्तरदिङ्मध्ये मत्स्योनापरपूर्विका

---

३७२ व.सं. अ. ३९ श्लो. १ तः ३

३७३ व.सं. अ. ३९ श्लो. ४ तः ८

रेखा स्यात्। मूढा ज्योतिषिका दिङ्मध्योद्भवो मत्स्यस्तथा च विदिशश्चोपदेशतः कल्पयन्ति। स बहिश्चात्र भुवि चतुरस्रः स्यात्। षड्वर्गशुद्धितश्चतुरस्रेण मार्गेणाल्पाधिकं चतुरस्रं कार्यं, प्राकारं च भुवि कल्पयेत्।[३७४]

४. **द्वारफलम्** — तत्र विस्तारे नाम गृहपिण्डे द्वारविस्तारः पुत्रपौत्रधनप्रदः। तथा च विस्तारकोणद्वारो दुःखशोकभयप्रदः। गृहपिण्डविस्तारे पूर्वादिचतुर्दिशायामष्टधा फलं प्रदक्षिणक्रमेण कथ्यते। दुःखः–शोकः–धनप्राप्तिः–नृपपूजा–विपुलधनप्राप्तिः–स्त्रीजन्म–पुत्रहानिः–एतत् पूर्वदिशि द्वार- फलं स्यात्। मृत्युः–बन्धनं–भयं–पुत्रप्राप्तिः–धनागमः–यशः–लाभः–चौर्यभयं तथा व्याधिभीतिश्च - एतद् दक्षिणदिशि द्वारफलं स्यात्। शत्रुवृद्धिः–पुत्रहानिः–लक्ष्मीप्राप्तिः–धनागमः–सौभाग्यं–धनलाभः–दुःख एवं शोकः– एतत् पश्चिमदिशि द्वारफलं स्यात्। निर्धनता–स्त्रीदूषणं–हानिः–संपत्प्राप्तिः–सुखागमः–दुःखागमस्तथा च शत्रुबाधा– एतदुत्तरदिशि द्वारफलं स्यात्।[३७५]

एतत्प्रकारे गृहद्वारनिर्माणे विस्ताराद् द्विगुणो द्वारोच्छ्रायः, तथा च द्वारविस्तारस्तदनुसारेण ज्ञेयः। पश्चिमे, दक्षिणे कपाटं च शुभप्रदम्।[३७६]

वास्तोरेकाशीतिपद एकाशीतिस्थानानि स्थापयेत्। मध्ये ब्रह्मस्थाने दोषो निधनमिति फलमाप्नोति। वास्तोश्चक्रस्य चतुर्दिक्षु द्वात्रिंशत् कोष्ठकानि विहाय समीपगाः प्राकाराः पैशाच्यमुक्तम्। एतेषु गृहनिर्माणं कृत्वा शोकरोगभयप्रदं स्यात्। मध्यभागात् चतुष्कोणगता तिर्यग्रेखाः स्युः। यद्ब्रह्ममार्गपिशाचांशशिराणां पुत्रसंयुतिः कथ्यते। वास्तोः मर्माणि सन्धयः, तथा च मर्मस्थानानि ज्ञात्वा मर्मसन्धिषु कालेषु कुड्यपादं न कारयेत्। शेषस्थानेषु निर्माणं पुत्रपौत्रवृद्धिकारकं स्यात्। इति स्वे स्वे निवेशन एवं निर्माणे सदैवैतत्सर्वं

---

३७४ व.सं. अ. ३९ श्लो. ९ तः १४

३७५ व.सं. अ. ३९ श्लो. १५ तः २०

३७६ व.सं. अ. ३९ श्लो. २१

विचिन्तयेत्।[३७७]

५. **गृहनिर्माणे नक्षत्रपरत्वेन शुभाशुभफलम्** -- यदि भौमो गृहनिर्माणकाले मघा-मूल-पुष्य-पूर्वाफाल्गुनी-हस्त-रेवतीनक्षत्रेषु वा स्थितस्तदा गृहमग्निना दह्यते। यद्यग्निनक्षत्रगे सूर्ये, चन्द्रे वा संस्थिते तदा यः योगस्तत्र निर्मितं गृहमचिरादग्निना दह्यते। पूर्वाभाद्रपदा-उत्तराभाद्रपदा-भरणी-अनुराधा-ज्येष्ठा-स्वातीनक्षत्रेषु वा, शनिना युक्ततदा यो योगस्तस्मिन् गृहनिर्माणं कृत्वा तद्गृहं यक्षराक्षसैर्गृह्यते। परवर्गं गत एकोऽपि ग्रहः, दशमद्वादशस्थाने वा स्थितो बली स्यात् , तदा गेहं परहस्तङ्गतं स्यात्। नीचराशौ शत्रुराशौ वा गुरुः शुक्रो बुधः सूर्यो वा संस्थितः, तदा यद्योगेन निर्मितं गृहं, तदा गृहस्वामिनः शीघ्रं निर्धनप्रदम्। पुष्यः-उत्तराफाल्गुनी-उत्तराषाढा-उत्तराभाद्रपदा-आश्लेषा-मृगशीर्षं-श्रवणः-रोहिणी-शतभिषा वा नक्षत्रे तथा च गुरुवासरे गृहारम्भः कृतः, गेहं श्रिया युतं (लक्ष्मीयुक्तं) विदधाति। विशाखा-चित्रा-शतभिषा-आर्द्रा-पुनर्वसुर्धनिष्ठा वा नक्षत्रे शुक्रः स्थितः, तदा यद्योगेन गृहारम्भः कृत्वा गेहं धनपुत्रसुखप्रदं करोति। गृहनिर्माणलग्ने तद्वर्गे वा गुरुः शुक्रो बुधो वा संस्थितः, तदा यद्योगेन कृतं गेहं सदा सर्वसंपत्प्रदं स्यात्। यद्येकादशस्थानेऽशत्रुनीचराशौ बुधः, चन्द्रमा सूर्यो वा संस्थितः, तदा तद्योगेन कृतं गेहमनेकप्रकारैधान्यैर्युतं स्यात्। यदि गृहनिर्माणलग्ने शुभग्रहद्वयं, त्रयं वापि संस्थितं, तदा गेहं बहुकालपर्यन्तं पुत्रपौत्रधनप्रदं स्यात्। स्थिरराशिगते, चरराशिगतेऽपि वा सूर्ये सदा गृहारम्भः कार्यः। द्विस्वभावराशिगते सूर्ये कदापि गृहारम्भो न कर्तव्यः। मेष-वृषभ-कर्क-सिंह-तुला-वृश्चिक-मकर-कुम्भराशौ वा सूर्यः संस्थितः, तदा गृहारम्भः शुभावहः। तथा च मिथुन-कन्या-धनु-मीनराशौ वा संस्थितः, तदा गृहारम्भो न कार्यः।[३७८]

---

३७७ व.सं. अ. ३९ श्लो. २२ तः २६

३७८ व.सं. अ. ३९ श्लो. २७ तः ४०

६. **मासपरत्वेन गृहारम्भफलम्** — माघ-फाल्गुन-वैशाख-श्रावण-आश्विन-कार्त्तिकमासेषु वा गृहनिर्माणं कृत्वा पुत्र-पौत्रदिकं तथा धनप्राप्तिरिति फलं लभ्यते।[३७९]

७. **पक्षपरत्वेन गृहारम्भफलम्** -- गुरुशुक्रयोर्दृश्यमाने, शुक्लपक्षे, दिने गृहारम्भनिर्माणं कार्यम्। न च रात्रिषु ।[३८०]

८. **अकारादिवर्गाणां स्वामिनः**- अकारादिवर्गेषु पूर्वादिदिक्क्रमेण यथाक्रमेण- गृध्रः-मार्जारः-सिंहः-श्वा-सर्पः-मूषकः-गजस्तथा शशकः स्वामिनः स्युः। अवर्गस्य स्वामी गृध्रः, कवर्गस्य मार्जारः, चवर्गस्य सिंहः, टवर्गस्य श्वा, तवर्गस्य सर्पः, पवर्गस्य मूषकः यवर्गस्य गजः, तथा च शवर्गस्य स्वामी शशकः स्यात्। दिग्वर्णानामियं योनिस्तथा च स्ववर्गात्पञ्चमो रिपुः कथ्यते। गृहनिर्माणे रिपुवर्गः परित्याज्यः शेषवर्गः शुभप्रदः स्यात्। साध्यवर्गं पुरः स्थाप्य पृष्ठतः साधकस्य वर्गं स्थापयित्वा तेभ्य अष्टभिर्विभजेत्, शेषं साधकस्य धनं स्मृतम्। विपरीतक्रमेणागतं यच्छेशं तत्साधकस्य ऋणं स्मृतम्।[३८१]

विस्तारायगुणितं (विस्तारः गुणितेन दैर्घ्यम्) गृहस्य पदमुच्यते। तस्माद् धनं-ऋणं-आद्यं-नक्षत्रं तथा च वारादीनां नवांशका ज्ञेयाः। गृहस्यागतनक्षत्रं यदि राश्यात्मकं तदा गृहे सर्वदा तन्नवांशवशात् ज्ञेया । गज(८), राम(३), अङ्क(९), वसु(८), ऋतुभिः (६) गुणितात्पदात् सूर्य (१२), अष्ट(८), र्क्ष(२७) शैल-अङ्कानि विभक्ता अवशिष्टकाः फलं स्मृतम्। ये सम्पूर्णा गृहारम्भे शुभदास्तथा चासम्पूर्णा गृहनिर्माणेऽनिष्टकारकाः स्युः। धनाधिके गृहवृद्धिस्तथा ऋणाधिके मृत्युः स्यात्। विषमायः शुभः स्यात् , समायो दुःखशोकप्रदः, गृह-गृहस्वामिनोर्मृत्युप्रदः स्यात्। विपत्तारा विपत्प्रदा, प्रत्यरितारा प्रतिकूलदा तथा च निधनतारा

---

३७९ व.सं. अ. ३९ श्लो. ४१

३८० व.सं. अ. ३९ श्लो. ४२

३८१ व.सं. अ. ३९ श्लो. ४३ तः ४६

सर्वदा मृत्युप्रदा स्यात्। अथैतानि तारकाणि वर्जयेत्, अन्यतारकायां गृहनिर्माणं शुभप्रदं स्यात्। यद्यज्ञानवशाद् विपरीततारकायां गृहनिर्माणं कुर्वन् जातको दुःखयुक्त एवं व्याधिभोगयुक्तः स्यात्। यथा विवाहे वरकन्ययो राशिकूटादिकं चिन्तयेत् , तद्वद्गृहनिर्माणेऽपि चिन्तयेत्। वैनाशिकनक्षत्राणि गृहे सर्वदा वर्जयेत्। द्विर्द्वादशयोगे निर्धनता, नवपञ्चमयोगे सन्तानहीनता तथा च षष्ठाष्टकयोगे निश्चयेन मृत्युः स्यात्। विपरीते शुभफलं ज्ञेयम्। कर्तृराशितस्तत्सर्वमुपर्युक्ततो भिन्नम्, अन्येषु स्थितिषु ग्रहाः सदैव शुभफलदाः। सूर्यारवासरे, तथा च तस्य नवांशे गृहनिर्माणं वह्निभयप्रदं स्यात्। शेषग्रहाणां राश्यंशा कर्तुरिष्टार्थसिद्धिदाः। तस्मात्सर्वं परीक्षणं कृत्वा दैवज्ञः सदा वदेत् ।[३८२]

भाद्रपदमासादारभ्य क्रमेण त्रिषु त्रिषु मासेषु वास्तुश्चलायमाना। तथा च गृहाधिपैश्चरवास्तुकारणेन पूजनीयः। यद्दिशि वास्तुपुरुषस्य मुखं तद्दिशि गृहद्वारं कृतं शुभावहम्। विपरीते अन्यदिग्वक्त्रगेहं दुःखशोकभयावहम्- इति फलम्।[३८३]

चतुर्द्वित्र्यादिशालानामेष दोषो न विद्यते। प्रधानद्वारं पश्येत् तत्रैव शङ्कुं स्थापयेत्। ग्रहानुकूले वास्तुनिर्माणं कार्यम्। चतुःशालादिषूत्तमं शङ्कुं स्थापयेत्। गृहमध्ये हस्तमात्रं खातं खनित्वा तत्खाते धान्यरत्नसुवर्णयुतमृत्तिकापात्रे शुभस्फटिकं स्थापयेत्। वास्तोर्विस्तारादर्धभागे नाभिः स्यात्। नाभितः सप्ताङ्गुले कुक्षिः स्यात्। कुक्षिभागे शङ्कुं न्यसेत्, पुत्रपौत्रधनादिः प्राप्नोति। यश्चतुर्विंशत्यङ्गुलमानं शङ्कुं स्थापयेत्, सर्वेषां प्रति सर्वदा शुभं स्यात्। सः शङ्कुर्गन्धपुष्पाम्बरस्वर्णधूपदीपैरलंकृतः स्यात्। रक्त-चन्दन-बिल्व-आम्र-खदिरादि-अर्जुन-वैणव-नीप-करञ्ज-कुटज-साल-निम्बादिवृक्षोत्पन्नो युग्मपत्र-महापत्र-गोरत्वक्कपजापक-रक्तसार-विशालत्वक्-वन्यागरुसम्भवः शङ्कुः स्यात्।

---

३८२ व.सं. अ. ३९ श्लो. ४७ तः ५६

३८३ व.सं. अ. ३९ श्लो. ५९, ६०

शङ्कोस्त्रयेण भाजिता, आद्यं चतुरस्त्रं, द्वितीयमष्टास्त्रकं तथा च तृतीयभागो लिङ्गाकार ऋजुर्निर्मित: शुभ:।[३८४]

९. **तुलसीपूजनं** – मृदुसंज्ञक–ध्रुवसंज्ञक–क्षिप्रसंज्ञकनक्षत्रेषु (मृगशीर्ष–चित्रा–अनुराधा–रेवती– उत्तराफाल्गुनी उत्तराषाढा–उत्तराभाद्रपदा–रोहिणी–अश्विनी–पुष्य–हस्तनक्षत्रेषु) रिक्तातिथिषु(४,९,१४) तथामावस्यातिथिं विहायान्यतिथिषु, रविवार–भौमवारे त्यक्त्वान्यवारेषु (सोम–बुध–गुरु–शुक्र– शनिवारेषु) तथाष्टममेवं लग्नस्थानं क्रूरग्रहैरयुतं वृश्चिकलग्नं त्यक्त्वान्यलग्नेषु, कर्तुरष्टमे शुद्धिसंयुते स्थिरोदये (स्थिरलग्ने), स्थिरनवांशे, दैवज्ञस्य पूजनं कृत्वा तुलसीपूजनमेवं शिलान्यास: कार्य:।[३८५]

शुभवासरे, शुभग्रहाणां नवांशे, महादोषविवर्जिते पुण्याहवाचनं कृत्वा, विप्राशीर्वाचनै: घोषैर्वादित्रै: सह सदा गृहारम्भं कुर्यात्। यदि त्रिकोणे (५,९), केन्द्रे (१,४,७,१०) तृतीये, षष्ठे, एकादशे वा शुभग्रहा: स्थितास्तथा च षट्त्र्यायगे (६,३,११) स्थाने पापग्रहा: स्थिता एवं लग्नत: द्वादशे षष्ठे वा स्थाने चन्द्रमा नास्ति, तत्काल उत्तमं शङ्कुं स्थापयेत् । धरणीतले शुभैर्यात्रोक्तशकुनैर्निमित्तैर्मङ्गलस्वनै: षड्वर्गशुद्धिसूत्रेण सूत्रयेत्। सूत्रितसमये तत्सूत्रं केनापि लङ्घितं, तदा तत्र प्रमाणत: पुरुषस्यास्थि विजानीयात्। तत्त्वं–योनि:–तारा–व्यय:–अंशकम्–आयस्तथा च गृहम्– एतानि षण्नामानि करणमुक्तम्। तान् बुद्धिमान् प्रयत्नेन विचिन्तयेत्। सूत्रिते समयेऽभ्यक्तो यस्यां दिशि दृश्यते, तद्दिशि शल्यं समादिशेत्। तस्यामेव सप्तत्यङ्गुलमानतोऽस्थीनि ज्ञेयानि। सूत्रिते समये यदि श्वा सूत्रोपरि संस्थित:, तदा तत्र षष्ठ्यङ्गुलमिते क्षितावस्थीनि विजानीयात्। तस्मिन्समये कोऽपि उच्चादेवागते संस्थिते तदा तत्रार्धहस्तद्वयमिते क्षितौऽस्थि विजानीयात्। चाण्डाले, जटिले यद्यागत:, यस्यां दिशि

---

३८४ व.सं. अ. ३९ श्लो. ६१ त: ६८

३८५ व.सं. अ. ३९ श्लो. ६९, ७०

स्थितस्तदाशीत्यङ्गुलमानतोऽधो तत्रास्थि ज्ञेयम्। यदि नर–गजाश्विपशूनामेकस्मिन्स्थाने संस्थिते तदा तत्र त्रयहस्तमिते क्षितौऽस्थि विजानीयात्। यदि सूत्रेण सूत्रिते समये यत्र गृहदाहो भवेत् तदा पुरुषस्यैकस्य प्रमाणतोऽजास्थि ज्ञेयम्।[३८६]

१०. **निमित्तशल्यम्** — यदि सूत्रेण सूत्रिते समये सूत्रे विसूत्रितेऽथवा कुम्भे विभग्ने, तदा क्रमेण दम्पत्योर्निधनमादिशेत्।[३८७]

**रवीन्दुनिमित्तशल्यम्** — आदित्यस्य षट्पदालयः, चन्द्रस्यायताकारगृहं तथा च तयोर्मध्ये कुजस्थानानि करत्रये शल्यान्यादिशेत्।[३८८]

**प्रश्नशल्यम्** — अवर्गोच्चारिते प्रश्ने पुरुषद्वयस्य प्रमाणतो गजास्थीनि प्राच्यां दिश्यादिशेत्। कवर्गोच्चारिते प्रश्ने हस्तप्रमाणतो मार्जारस्य, अजस्य वा शल्यमग्निकोण आदिशेत्। चवर्गोच्चारिते प्रश्ने हस्तप्रमाणतः (अधः) कपेः, लुलायस्य वा शल्यं याम्यां दिश्यादिशेत्। टवर्गोच्चारिते प्रश्ने सार्धहस्तप्रमाणतः (अधः) शुनः शल्यं, नृशल्यं वा नैऋत्यकोण आदिशेत्। तवर्गोच्चारिते प्रश्ने हस्तद्वयमिते क्षितौ सर्पस्याजशल्यं वा प्रतीच्यां दिश्यादिशेत्। पवर्गोच्चारिते प्रश्ने हस्तखातप्रमाणतः (अधः) क्षितावश्वस्य मेषस्य वा शल्यं वायव्यकोणे समादिशेत्। यवर्गोच्चारिते प्रश्ने पूर्वखातप्रमाणतः (१ हस्तप्रमाणतः) अधः क्षितौ गजस्याश्वस्य शल्यं वोदीच्यां दिशि समादिशेत्। शवर्गोच्चारिते प्रश्ने हस्तद्वयमितेऽधः क्षितौ शशकस्य वा शल्यमैशान्यकोणे समादिशेत्। प्रश्नोच्चारणे यदि विघ्नं भवेत्, तदा नरखातप्रमाणतोऽधः क्षितौ नृशल्यं गजशल्यं वा ब्राह्मस्थाने समादिशेत्। प्रश्नोच्चारणे यदि वर्गस्य पञ्चमाक्षरमागतं, तदा तत्र किमपि शल्यं न विद्यते, यत्किञ्चिन्मात्रसंशयो नास्ति – इति

---

३८६ व.सं. अ. ३९ श्लो. ७१ तः ८०

३८७ व.सं. अ. ३९ श्लो. ८१

३८८ व.सं. अ. ३९ श्लो. ८२

ब्रह्मणोक्तम्।[३८९]

एक-द्वि-त्रि-चतुः-पञ्च-षष्ठ-सप्त-अष्ट-नव-दशप्रमाणेन दशप्रकारकाः शाला नवशाल्यसहिता दशभेदयुक्ताः स्युः। प्रत्येकं दशषड्विधैः(षोडशैः) अलिन्दभेदैः षष्ठिभिः सहिता सप्तमिता शाला प्रकीर्तिताः। ताश्चापि रूपादिग्रामप्रस्तारैर्विविधाः स्मृताः। तासां समस्तभेदानां प्रस्ताराः कथिताः।[३९०]

## ११. प्रस्तारसहितानि षोडशगृहाणि,तेषां नामानि, फलानि च ——-

गुरोरधो लघुः स्थाप्यः पुरस्तादूर्ध्ववन्न्यसेत् ।

गुरुभिः पश्चिमं पूर्वं सर्वधावधिर्विधिः ।। ९६

अस्यार्थः- गुरुस्थानतोऽधो लघुं स्थापयेत्। एतत्क्रमेणोर्ध्वाधो भाज्यो भाजको वांशहररूपेण स्थापयेत्। तथा परस्पराणामग्रिमलब्धिर्धृता सर्वलब्धिप्राप्तिर्भवति। गृहद्वारात् प्रदक्षिणक्रमेण लघुस्थानेऽलिन्दः, तथा च गुरुमाश्रितोऽलिन्दः स्यात्। एतत्प्रकारेण गृहद्वारादलिन्देषु षोडशा भेदा गृहाणां स्मृताः। तेषां नामानि ध्रुवं धान्यं जयं नन्दं खरं कान्तिं मनोरमं सुवक्त्रं दुर्मुखं क्रूरं विपक्षं धनदं क्षयम् आक्रन्दं विपुलं षोडशं विजयं गृहमित्येवमेकशालभेदाः शेषाणामेवमेव स्यात्।[३९१]

## निम्नलिखितानि षोडशप्रकाराणि गृहाणि, तेषां फलानि [३९२] —

१) ध्रुवसंज्ञकम् - एतद् धनधान्यसुखप्रदं स्यात्।

२) धान्यसंज्ञकम् - एतन्मनुष्याणां धनधान्यसुखप्रदं स्यात्।

३) जयसंज्ञकम् - विजयप्रदं स्यात्।

---

३८९ व.सं. अ. ३९ श्लो. ८३ तः ९२

३९० व.सं. अ. ३९ श्लो. ९३ तः ९५

३९१ व.सं. अ. ३९ श्लो. ९६ तः ९९

३९२ व.सं. अ. ३९ श्लो. १०० तः १०३

४) नन्दसंज्ञकम् - स्त्रीहानिदं स्यात्।

५) खरसंज्ञकम् - निश्चयेन सम्पत्तिविनाशं करोति।

६) कान्तिसंज्ञकम् - पुत्रपौत्रप्रदमिति फलमाप्नोति।

७) मनोरमसंज्ञकम् - श्रीप्रदं /लक्ष्मीदायकम् स्यात्।

८) सुवक्त्रसंज्ञकम् - भोगदं स्यात्।

९) दुर्मुखसंज्ञकम् - विसुखप्रदं स्यात्।

१०) क्रूरसंज्ञकम् - सर्वदु:खप्रदं भवति।

११) विपक्षसंज्ञकम् - शत्रुभीतिदम्।

१२) धनदसंज्ञकम् - धनप्रदं भवति।

१३) क्षयसंज्ञकम् - क्षयप्रदं भवति।

१४) आक्रन्दसंज्ञकम् - फलं नोक्तम्।

१५) विपुलसंज्ञकम् - फलं नोक्तम्।

१६) विजयसंज्ञकम् - धनदं, विजयप्रदं स्यात्।

## षोडशगृहाणां विशेषफलम्[३९३] —

१) ध्रुवसंज्ञकम् - द्वित्रिभूमायं धरातलं सौधसंज्ञकम्। सर्वक्षत्रियाणां सुवर्णशिखर: प्रासाद: स्यात् । सौधाख्यं गृहं निरन्तरं (शश्वत्) धनधान्यप्रदं यद्यपि प्रासादसदनं शश्वदारोग्यसुखप्रदं स्यात्। अस्य पुरतो मण्डपं, तदेव भुवनेश्वरं स्यात्। तथा च तद्गृहं विश्वरूपनाम्नोक्तम्। यत्सदा सर्वसम्पत्प्रदं स्यात्।

---

३९३ व.सं. अ. ३९ श्लो. १०४ त: १२१

२) धनसंज्ञकम् – धनाख्यं द्वित्रिचतु:पञ्चादिभूमिकं गृहं नृपाणां सदा वित्तवृत्त-सुखप्रदं स्यात्।

३) जयसंज्ञकम् – जयाख्यसदनं द्वितीयादिभूमिकं स्यात्।

४) विमुखसंज्ञकम् – विमुखाख्यं गृहं सदा भार्यानाशप्रदं स्यात्।

५) नन्दसंज्ञकम् – नन्दाख्यं गृहं द्वितीयादिभूमिकं स्यात्। यत्पूर्णचन्द्रसमं नृपाणां सुखमाप्नोति।

६) खरसंज्ञकम् – खरनाम-गृहं द्वितीयादिभूमिकम्।

७) आसुरसंज्ञकम् – आसुरसंज्ञकगृहं दु:खशोकभयप्रदम्।

८) मनोरमसंज्ञकम् – प्रासाद: सौधो वा यदा मनोरमगृहं तदा तदानन्दसदनं नाम चित्तानन्दप्रदं स्यात्।

९) सुवक्त्रसंज्ञम् – प्रासाद: सौधो वा यदा सुवक्त्रं सुवदनं तदा हाटकमिति नाम तद् गृहं सदैव सुवर्णप्रदमेव शुभं स्यात्।

१०) दुर्मुखसंज्ञकम् – प्रासाद: सौधो वा यदा दुर्मुखसदनं तदा दुर्मुखनाम। तद्गृहं सर्वकार्यविनाशकं स्यात्।

११) क्रूरसंज्ञकम् – प्रासाद: सौधो वा यदा क्रूराख्यं सदनं तदा क्रूराख्यम्। तद् गृहं दु:खशोकभयप्रदं स्यात्।

१२) विपक्षसंज्ञकम् – प्रासाद: सौधो वा यदा विपक्षसदनं तदा शत्रुसंज्ञकगृहं सर्वदा शत्रुभीतिदं स्यात्।

१३) धनदसंज्ञकम् – प्रासाद: सौधो वा यदा धनदाख्यं गृहं भवेत् तदा धनधान्य-प्रदं, धनधान्यसुखावहं गृहं स्यात्।

१४) क्षयसंज्ञकम् – प्रासाद: सौधो वा यदा क्षयाख्यं सदनम्।

तद् गृहं सर्वदा आयु:क्षय:प्रदं स्यात्।

१५) आक्रन्दसंज्ञकम्- प्रसाद: सौधो वा यदा आक्रन्दसदनं तदा सदाग्निभयं स्यात्।

१६) विपुलसंज्ञकम् - प्रसाद: सौधो वा यदा विपुलाख्यं तदा विपुल-धन-धान्यप्रदं स्यात्।

१७) विजयसंज्ञकम् - प्रासाद: सौधो वा विजयाख्यं तदा गृहं सर्वदा विजयप्रदं स्यात्। तद्गृहं विजयं नाम स्मरणमात्रेण विजयप्रदं स्यात्।

चतुर्द्वारसमन्वितमेकशालागृहं, विश्वतोमुखसंज्ञकं गृहं सम्पूर्णमनोरथानां सिद्धिप्रदम्। तदेव प्रवरैर्युक्तं कोणमध्ये स्थितं तद्गृहं पुण्डरीकनाम्ना सर्वकामफलप्रदं भवेत्। पश्चिमद्वारहीनं श्रीनिलयं नाम गृहं राज्ञां सर्वदा श्रीप्रदं पुत्रपौत्रप्रवर्धनं भवेत्। यद्गृहे पश्चिमदिशि द्वारं विहायान्यासु त्रिषु दिक्षु द्वारं स्यात्। उत्तरदिशाहीनं द्वारं सूकराख्यम्। तद् गृहं सूकरभयदं तथा च भूपतेर्भयं कारयेत्। तद्गृहे उत्तरां दिशं विहायान्यासु त्रिषु दिक्षु द्वारं स्यात्। पूर्वदिशाहीनं द्वारं व्याघ्रसंज्ञकं गृहं तस्करात्तथा च चतुष्पदाद् भयमाप्नोति। यद्गृहे पूर्वदिशं विहाय अन्यासु त्रिषु दिक्षु द्वारं स्यात्। दक्षिणदिशा हीनं द्वारं शेखरसंज्ञकं गृहमुक्तम्। यद्गृहं सदा सर्ववस्तुप्रदं, सर्वरत्नप्रदं चेति फलं प्राप्नोति। यद्गृहे दक्षिणदिशं विहाय (पूर्व-पश्चिम-उत्तरदिक्षु) द्वारं स्यात्। इत्येवमेकशालाभेदानि सन्ति। यो मनुजो द्विशालां कर्तृकामो, स: सम्यक्परीक्षणं कुर्यात्, तदनन्तरं तद्विषये विचिन्तयेत्।[३९४]

**१२. द्विशालसंज्ञकगृहभेदा:** — याम्य-पश्चिमयोर्द्विशालगृहं कमलाकरसंज्ञकं गृहं नृणां सर्वदा श्रीप्रदं, सर्वभोगदं स्यात्। तद्गृहं नामानुसारेण सदैव मनुष्याणां लक्ष्मीप्रदं तथा च

---

३९४ व.सं. अ. ३९ श्लो. १२२ त: १२८

सम्पूर्णभोगानां फलं प्राप्तं भवति। पश्चिमोत्तरयोर्द्विशालगृहं श्वापदं नाम्ना ख्यातम्।तत् सदैव हृद्रोगदु:खभयदमथवा चौरभीतिकरम्। पूर्वोत्तरयोर्द्विशालगृहं विपक्षं नाम्ना ख्यातम्। तन्निरन्तरं दु:खं ददाति, शत्रुत: सदैव भयमाप्नोति तथा च तस्करद्वारा भीतिमाप्नोति। पूर्वदक्षिणयोर्द्विशालगृहं सर्पद्रंष्टिकेति नाम्ना प्रोक्तम्। तद्गृहं सर्वदाधिव्याधिप्रदं तथा व्यालचौराद् विशेषभयमाप्नोति। दक्षिणपश्चिमयोर्द्विशालगृहं मङ्गलाष्टदं कथ्यते। तस्मिन्नेव प्रासादं सौधं वा कारयेत्। अन्यदिशायां द्विशालगृहनिर्माणं मनुष्याणां निर्धनताप्रदं तथा शोकप्रदं स्यात्। अतोऽन्यदिशायां द्विशालगृहनिर्माणं प्रयत्नात् परिवर्जयेत्। द्विशालाद्येषु सर्वेषु द्वि-त्रि-पञ्चादिभूमिकैरेवमनुक्रमात् षोडशगृहाणि भवन्ति। तत्र प्रथमं भवनं खण्डेन्दुसंज्ञकं कथ्यते। द्वितीयं भवनं बुद्धिवर्धकं कथ्यते। तृतीयं भवनं शङ्खसंज्ञकं सर्वदा धनायु:स्त्रीप्रदं भवति। चतुर्थं, पञ्चमं गृहं स्त्रीसौभाग्यविनाशदम्। षष्ठं सप्तममष्टमं गृहं सर्वदा लाभायु:श्रीप्रदं स्यात्। नवमं दशममेकादशं गृहं दु:ख-रोग-शोक-भयप्रदं स्यात्। द्वादशगृहं निश्चयेन सदैव धनधान्यप्रदं स्यात्। त्रयोदशं चतुर्दशं गृहं सदैव शोकदु:खप्रदं स्यात्। पञ्चदशं षोडशं गृहमायुरारोग्यवृद्धिदं स्यात् । इति द्विशालभेदा उक्ता: ।[३९५]

१३. **गृहनिर्माणे त्रिशालभेदा:** — उत्तरदिशि मुखं त्रिशालगृहं जयन्तीसंज्ञकं विपुलकीर्तिदं तथा च नृपाणां पुत्रपौत्रधनप्रदं स्यात्। उत्तरद्वारयुतं स्वर्णगर्भं त्रिशालं क्षितौ नृणां सर्वदा दु:खशोकविनाशदं स्यात्। स्वर्णदनाम्ना ख्यातं त्रिशालमुत्तरमुखद्वारस्य यत्फलं तदेवाप्नोति। प्राक्द्वारसहितं त्रिशालगृहं हरिपदनाम्ना ख्यातम्।यत्सदैव राज्ञां प्रधानरूपेणेप्सितार्थफलप्रदम्। प्राङ्मुखं नक्षत्रप्रदसंज्ञकं त्रिशालं नानाकल्याणप्रदं निरन्तरपुत्रपौत्रवर्धनं स्यात्। दक्षिणद्वारयुतं त्रिशालगृहमुष्ट्रदंष्ट्रासंज्ञकं ख्यातम्। तत्पृथ्वीलोके स्थितानां नृपाणां निर्धनताप्रदानं करोति। तथा च शत्रुभीतिदं स्यात्। स्वर्णदात्रीशाला यदि

३९५ व.सं. अ. ३९ श्लो. १२९ त: १४०

दक्षिणमुखा तथा कुलक्षयकरा स्यात्। पश्चिमद्वारयुतं त्रिशालगृहं कुसुमसंज्ञकं ख्यातम। तन्नृणां मित्रवृद्धिं तथा भ्रातृवृद्धिं करोति। क्षयाख्या पश्चिममुखा त्रिशाला कथ्यते। पापसंज्ञकशालां दृष्ट्वा सूर्यं निरीक्षेत्। सा बहुव्ययकरी तथा च पुत्रायुर्धननाशदा, इति फलं प्राप्नोति। बुद्धिमान् गृहोपरि गृहाणां विषयेऽपि सम्यक् चिन्तयेत्।[३९६]

१४. **गृहाणां चतुःशालानां भेदाः —** चतुःशाला चतुर्भेदा नामरूपफलैः पृथक् सर्वतो भद्रसंज्ञिता पितामहोक्तमार्गेणोक्ता। पश्चिमद्वारसहिता नन्द्यावर्तसंज्ञका चतुःशाला नृणां विपुलायुरारोग्यकीर्तिसंपत्प्रदा। उत्तरद्वारसहिता रुचकसंज्ञका चतुःशाला निरन्तरं सुगन्धवस्तुनिचयवस्त्ररत्नप्रदा। पूर्वद्वारसहिता स्वस्तिकसंज्ञका चतुःशालान्नपानादिनिखिलभोग- सौभाग्यपुत्रदा। दक्षिणद्वारसहिता वर्धमानसंज्ञका चतुःशाला नृणां सदैव गजाश्वपशुलोहादिभूषणश्रीपदा। चतुःशालायां मध्यभागे पूर्वमुखगृहद्वारं कुर्यात्, तत्र श्रिया सह (लक्ष्मीवृद्धिद्वारा) सर्ववस्तूनि वर्धन्ते। चतुःशालायां मध्यभागे गृहद्वारं कुर्यात् ,तदा गृहराण् नाम्ना प्रकीर्तिता। गृहं यदि दक्षिणमुखं तदा कुबेरसंज्ञकमुक्तम्। तद्गृहं सदैव कुबेरगृहसमानं सर्वसम्पत्प्रदम्। यद्गृहं पश्चिमाभिमुखं तन्महेन्द्रसंज्ञकं प्रोक्तम्। तद्गृहं सदैवेन्द्रगृहसमानं सर्वसम्पद्युक्तमित्युक्तम्। गृहं यदि उत्तराभिमुखं, तद्वारुणसंज्ञकं प्रोक्तम्। तद्गृहं सदा सर्वरत्नालयं, सर्वभोगसुखावहमित्युक्तम्। यदि प्रासादः सौधो वा तद्गृहे तदा चन्द्रशेखरनाम्ना ख्यातः। तद्गृहं निधीनामालयं भवति। तद्गृहे नवनिधयो निवसन्ति। यदि कोणे गृहं (चतुःशालासंज्ञकभेदं ) तदा महेन्द्रसंज्ञकं प्रोक्तम्। तत्रेन्द्रालयसमानः सर्वसम्पदालयः। अस्यामपि द्वि-त्रि-चतुः-पञ्च-षट्-सप्तभूमिकैः षोडश प्रस्ताराः क्रमेण स्युः। तत्र पञ्चादिदशतलपर्यन्ताः शालाः प्रकल्पयेत्। तेषां प्रस्तारानि फलानि, नामानि

---

३९६ व.सं. अ. ३९ श्लो. १४१ तः १४९

नामानि, रूपादिफलानि वास्तुशास्त्रज्ञैः कथितानि।[३९७]

१५. **गृहमध्य उपकरणानां व्यवस्था** — पूर्वदिशायां स्नानागारः, अग्निकोणे भोजनालयः, दक्षिणदिशायां शयनकक्ष :, नैर्ऋत्यकोणे शस्त्रमन्दिरं, पश्चिमदिशायां भोजनगृहं, वायव्यकोणे पशुमन्दिरं, उत्तरदिशायां शृङ्गारादिप्रसाधनं तथेशानकोणे देवमन्दिरमिति गृहमध्ये व्यवस्था कुर्यात्। पूर्वाग्निकोणयोर्मध्ये दधिमन्थनादिकं, दक्षिणाग्निकोणयोर्मध्ये रतिमन्दिरं(शृङ्गार-भूविलासः), दक्षिणनैर्ऋत्यकोणयोर्मध्ये पुरीषत्यागमन्दिरं, पश्चिमनैर्ऋत्यकोणयोर्मध्ये विद्याभवनमध्ययनस्य मन्दिरं, पश्चिमवायव्यकोणयोर्मध्ये रुदन-रोदनकक्षः, उत्तरवायव्यकोणयोर्मध्ये कामोपभोगकक्षः उत्तरेशान्यकोणयोर्मध्ये चिकित्साकक्षः, पूर्व-ईशान्यकोणयोर्मध्ये सर्ववस्तुसंग्रहकक्षः- एवंप्रकारेण क्रमशः षोडशकक्षाः (सदनानि वा)कारयेत्।[३९८]

१६. **आयानां शुभाशुभफलम्** —- ध्वजादीनामष्टानामायानां नामानि क्रमेण- ध्वजः-धूम्रः-हरिः-श्वः-वृषः-गर्दभः-कुञ्जरः (गजः ) -ध्याङ्क्षः- एतानि आयनामानि स्वस्थाने, स्वगृहे शुभानि सन्ति। गजाये, ध्वजाये वा गजशालाः शुभाः सन्ति। गजाये, ध्वजाये, वृषाये, खराये वा अश्वालयाः शुभाः सन्ति। गजाये, ध्वजाये, वृषाये वा ऊष्ट्राणां मन्दिरं शुभं कथ्यते। वृषाये, ध्वजाये वा पशुगृहं सदैव शुभं कथ्यते। वृषाये शय्यागृहं शस्तम्। सिंहाये शय्यायाः पृष्ठभागः शुभप्रदः। वृषाये, ध्वजाये वा अन्नच्छत्रवस्त्राणि श्रेष्ठानि। सिंहाये, ध्वजाये वा पादुकोपानहौ कार्यौ शुभावहौ। गृहोपरि गृहादीनामायमात्रं प्रकल्पयेत्। षडवर्गशङ्कुमप्यायसद्मनि न स्थापयेत्। गृहपादाः, गृहस्तम्भाः समाः कार्याः। असमाना गृहस्तम्भास्तथा च गृहपादा अशुभाः। गृहकुड्यानां यथारुचि नात्युच्छ्रितं नातिनीचं निर्माणं

---

३९७ व.सं. अ. ३९ श्लो. १५० तः १६३

३९८ व.सं. अ. ३९ श्लो. १६४, १६५, १६७ तः १७०

कार्यम्। भित्तिः पक्वेष्टाकाभिः, दारुणा, मृदा वा कार्या। तृणैः पर्णैश्च चित्रपटैर्वापि न क्वचित् कार्या। एतैर्गृहं कुर्वन् पूर्वादिक्रमेण ऐश्वर्यं-पुत्रहानिः-स्त्रीहानिः-मृत्युः-सम्पत्तिः-शत्रुभयं-पुष्टिः -इत्यादिकं फलं प्राप्तं भवति। अस्यार्थः-गृहस्य पूर्वदिशि ऐश्वर्यम्, अग्निकोणे पुत्रहानिः, दक्षिणदिशि स्त्रीहानिः, नैऋत्यकोणे मृत्युः, पश्चिमदिशि सम्पत्तिः, वायव्यकोणे शत्रुभयम्, उत्तरदिशि पुष्टिः -इति फलं प्राप्नोति।[३९९]

१७. **जलाशयफलम्** — मन्दिराणां जलस्रावोऽष्टविधो वर्तते। ते क्रमेण पाञ्चालः - वैदेहः -कुरुः- कान्यकुब्जः- मगधः- शूरसेन-गान्धारः-अवन्तीसंज्ञकः (उज्जयिनी)- एषामष्टविधानां च प्रमाणं सम्यगुच्यते । तत्र पाञ्चाले चतुर्गुणितमानं विस्तार उच्छ्राये कथितः। अन्येषां प्रमाणाः पाञ्चालाद् द्व्यङ्गुलोत्तरवृद्धिदः। वैदेहादीनि सर्वाणि मानानि यथाक्रमात् स्युः। पाञ्चालमानः सर्वेषां शुभः, अवन्तीमानः विप्राणां श्रेष्ठः, गान्धारमानः क्षत्रियाणां, कान्यकुब्जमानो वैश्यानां ,वैदेहमानः शूद्राणां कृते शस्तः। हर्म्याणि नानाविधानि जालकचित्रितानि कुर्युः। तथा च गृहस्य पश्चिमे, दक्षिणे गवाक्षनिर्माणं कार्यम्। गृहस्य मध्यभागे कूपनिर्माणं कृत्वा धनहानिरिति फलं प्राप्तं भवति। बुद्धिमान् तस्मात्सम्यग्विचार्य कूपनिर्माणं कारयेत्।[४००]

१८. **गृहं परितः सर्वदिक्षु वृक्षाणां शुभाशुभफलम्** — उदुम्बरः-प्लक्षः-निम्बः-आम्रः-स्नुहि-बिभीतकः-बदरी-खदिरः तथा च अन्यकण्टकवृक्षाः, तथा च वटः-अश्वत्थः-कपित्थाख्यतिन्तिणीकतकद्रुमाः-अगस्ति-शिग्रु-पलाशादयस्तथा च दुग्धवृक्षा निन्दिताः। करञ्ज-एरण्ड-निर्गुण्ड- इत्यादयो वृक्षा निन्दिताः, अतस्त्याज्याः। पुन्नागः-अशोकः-तिलकः-शमी-बकुलः-चम्पकः-दाडिमः-पिप्पली-द्राक्षा-पिचुमन्दा -जयस्तथा

---

३९९ व.सं. अ. ३९ श्लो. १६६, १७१, १७२, १८०, १८१ तः १८३

४०० व.सं. अ. ३९ श्लो. १७३ तः १७९

अमरवेल:-बन्धूक:-पुंगव:-पनस:-सरोज:-गृहमल्लिका-मालिका-पाटल:-जाति-नारिकेल: -इत्यादयो वृक्षा गृहाङ्गणे सर्वदा मङ्गलप्रदा:। प्लक्षकर्कन्धुवृक्षौ द्वौ गृहस्योत्तरदिशि शुभावहौ। स्वगृहात्पश्चिमे, तथा याम्ये पितुस्तथा च स्वाग्रजानां गृहनिर्माणं कार्यम्। गृहस्य पूर्वदिशि न्यग्रोधोदुम्बराश्वत्थास्तथा च हरिद्रा-कदली-अगस्ति:-मातुलिङ्गाख्या वृक्षा: शुभप्रदा:। यद्येते वृक्षा: स्वयं प्रजातास्तदा गृहनिर्माणे तथा च त्रिविधप्रवेशेऽपि दु:खशोकभयप्रदा: स्यु:।[४०१]

## १९. गृहनिर्माणे एकाशीतिपदवास्तुदेवतास्थापनं तथा पूजनं —

गृहमध्ये हस्तमात्रं समन्तात्तण्डुलोपरि एकाशीतिपदवास्तुमण्डल एकाशीतिपदानां तिलैस्तुल्यं सुशोभनं कार्यम्। तथा च तत्रैकद्वित्रिपदस्थितानां पञ्चचत्वारिंशद्(४५)देवतानां पूजनं कार्यम्। बाह्यतो द्वात्रिंश तथा च अन्त: त्रयोदशस्थानानि, नामानि ईशानकोणत: । तत्र ईशानकोणे अग्निरेकपदेश्वर:, तस्माद् द्वितीय: पर्जन्य एकपदेश्वर:, तदनन्तरं जयन्त-इन्द्र-सूर्य-सत्य-भृशाश्च द्विपदेश्वरा:, पुन: आकाश:-वायु: क्रमेणैकपदेश्वरा:। एवं पूर्वदिशि नव ज्ञात्वा, अन्यदिक्षु च नव ज्ञेया:। एकपादा आद्ये चान्ते, मध्ये पञ्च द्विपादा: स्यु:। पूषाद्यष्टौ यमान्ता देवता याम्यभागगा: स्यु:। अष्टौ पितृगणाधीशा यमान्ता पश्चिमे देवता: स्यु:। तत्राद्यन्तौ द्वावेकपदौ, पञ्च मध्यगा द्विपदा: स्यु:। रोगादिरित्यन्तसुरा: क्रमेण सप्त उत्तरदिशि, तदधस्थश्चतुष्कोण ईशानादिक्रमेणाप:-सावित्र-विजय-रुद्रा एकपदेश्वरा देवता:। मध्ये ब्रह्मा नवपद:, तस्येशानकोणे आपवत्स-सविता-विबुधाधिप-राजयक्ष्माश्चत्वारो देवता एकपदेश्वरा: स्यु:। ब्रह्मण: पूर्वतो दिक्षु क्रमेण अर्यमा-विवस्वान्-मित्र-पृथ्वीधराश्चत्वारो देवतास्त्रिपदेश्वरा: स्यु:। स्वस्वस्थानेषु देवतास्थापनं कृत्वा कोणेषु पञ्च पञ्चैव चतुर्ष्वेकपद-देवतानां स्थापनं कार्यम्। पूर्वादिदिक्षु द्विपदेश्वरदेवतानां पञ्च पञ्च यथाक्रमात् तथा ब्रह्मण:

---

४०१ व.सं. अ. ३९ श्लो. १८४ त: १९५

पूर्वतो दिक्षु द्विपदेश्वरदेवतानां समीपे स्थापनं कार्यम्। ब्रह्मा-पर्जन्य-जयन्त-इन्द्र-सूर्य-सत्य-भृश-आकाश-वायु-पूषा-गृहक्षत-यम-गन्धर्व-मृगराज-मृग-पितृगण-अधीश-दौवारिक-सुग्रीव-पुष्पदन्त-वरुण-असुर-शोष-पाप-रोग-अहि-मुख्य-भल्लाट-सोम-सर्प-दिति-अदिति- एते द्वात्रिंशद्देवताः स्मृताः। आपः-आपवत्स-जय-रन्ध्रास्तथैवैते स्युः। मध्ये नवपदो ब्रह्मा तस्थौ, तस्य समीपगः पूर्वादिक्रमेण अन्तरिता देवता परितो ब्रह्मणः स्मृताः। अर्यमा-सविता-विवस्वान्-विबुधाधिपः-मित्रः-राजयक्ष्मा-पृथ्वीधरः- एतेषामष्टदेवतानां स्थानानि कथितानि। इति पञ्चचत्वारिंशद्देवतानां स्थानानि नामानि च ज्ञात्वा ब्रह्मणा सहितान्यसेत्। वास्तुज्ञाता वास्तुमन्त्रेण गन्धपुष्पाक्षतादिभिः ॐकारेण स्वस्वदेवतानर्चयेत्। युग्मशुक्लवस्त्रं, धूपदीपफलैः सह दद्यात्। अपूपैर्भूरिनैवेद्यैर्वाद्यैः सह समर्पयेत्। ततो ताम्बूलं च देवेभ्यश्च पृथक् पृथक् दद्यात्। पुष्पाञ्जलिं दत्त्वा वास्तुपुरुषं प्रार्थयेत्। अनन्तरं विप्रेभ्यो भोजनं दत्त्वा बन्धुभिः सह स्वयं भुञ्जीत। नमस्ते वास्तुपुरुष भूशय्यानिरत प्रभो। मद्गृहे धनधान्यादिसमृद्धिं सर्वदा कुरु। इति प्रार्थयेत्, अर्चकाय दक्षिणां दद्यात्। एवं सम्यग्वास्तुपूजां प्रयत्नतो यः कुरुते, स नर आरोग्य-पुत्रपौत्रादि-धनधान्यादिकं लभेत्। वास्तुपूजामकृत्वा यो नूतनगृहं प्रविशेत्, स नानाविधरोगान्, क्लेशान्, सर्वसंकटान् अश्नुते।[४०२]

४०२ व.सं. अ. ३९ श्लो. १९६ तः २२२